सर्वमितिकरणाल्लभ्यते । यत् तत्र इति निर्दिष्टं ग्रहणं चेत् तद् भवति, यत् तेन इति निर्दिष्टं प्रहरणं चेत् तद् भवति, यत् इदम् इति निर्दिष्टं युद्धं चेत् तद् भवति । केशेषु केशेषु [1]च गृहीत्वा [2]इदं युद्धं [3]प्रवृत्तं केशाकेशि । कचाकचि । दण्डैश्च दण्डैश्च प्रहृत्य इदं युद्धं प्रवृत्तं दण्डादण्डि । मुसलामुसलि । 'इच् कर्मव्यतीहारे' (५.४.१२७/८६६) इति इच् समासान्तः, स [4]चाव्ययम् । 'अन्येषामपि दृश्यते' (६.३.१३७/३५३९) इति पूर्वपदस्य दीर्घत्वम् । सरूपग्रहणं किम्? हलैश्च मुसलैश्च[5] प्रहृत्य इदं युद्धं प्रवृत्तम् ॥

## तेन सहेति तुल्ययोगे । (२८/८४८)

सह इत्येतच्छब्दरूपं तुल्ययोगे वर्तमानं तेन इति तृतीयान्तेन [6]सह समस्यते, बहुव्रीहिश्च समासो भवति । सह पुत्रेणागतः सपुत्रः[7] । सच्छात्रः[8] । [9]सकर्मकरः । तुल्ययोगे इति किम्? सहैव दशभिः पुत्रैर्भारं वहति गर्दभी[10] । विद्यमानैरेव दशभिः पुत्रैर्भारं वहति इत्यर्थः । कथं सकर्मकः, सलोमकः, सपक्षकः इति ? न ह्यत्र तुल्ययोगो गम्यते । किं तर्हि ? विद्यमानता । प्रायिकं तुल्ययोगे इति विशेषणम् । अन्यत्रापि[12] समासो दृश्यते ॥

## चार्थे द्वन्द्वः । (२९/९०१)

अनेकम् इति वर्तते । अनेकं सुबन्तं[13] चार्थे वर्तमानं समस्यते, द्वन्द्वसञ्ज्ञश्च समासो भवति । समुच्चयान्वाचयेतरेतरयोग[14]समाहाराश्चार्थाः । तत्र समुच्चयान्वाचययोरसामर्थ्यात् नास्ति समासः । इतरेतरयोगे समाहारे च समासो[15] विधीयते । प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ । धवश्च खदिरश्च पलाशश्च धवखदिरपलाशाः । [16]वाक् च त्वक् च वाक्त्वचम् । [17]वाग्दृषदम्[18] । द्वन्द्वप्रदेशाः — 'द्वन्द्वे च' (१.१.३१/२२४) इत्येवमादयः ॥

## उपसर्जनं पूर्वम् । (३०/६५४)

समासे [19]इति वर्तते । उपसर्जनसञ्ज्ञकं समासे पूर्वं प्रयोक्तव्यम् । पूर्ववचनं परप्रयोगनिवृत्त्यर्थम् । अनियमो हि स्यात् । द्वितीया – कष्टश्रितः । तृतीया – शङ्कुलाखण्डः । चतुर्थी – यूपदारु । पञ्चमी – वृकभयम् । षष्ठी – राजपुरुषः । सप्तमी – अक्षशौण्डः ॥

---

1. च नास्ति ब. 2. इदं नास्ति क. 3. कृतं फ, वृत्तम् इ. 4. अव्ययः क. 5. च प्रहृत्य नास्ति ड. 6. सह नास्ति फ. 7–8. आगतः इत्यधिकम् ड. फ. 9. सकर्मकराः ब, सपक्षकः इत्यधिकम् क. 10. सत्स्वेव दशपुत्रेषु सैव भारस्य वाहिका इत्यधिकम् ब. 11. बहुभिः ब. क. इ. 12. हि इत्यधिकम् क. इ. 13. समर्थं इत्यधिकम् फ. 14. समाहाराश्चेति इ. 15. विधीयते नास्ति ब. फ. 16. उदाहरणमिदं नास्ति फ. 17. स्रग्दृषदम् इत्यधिकम् फ, शमीदृषदम् इत्यधिकम् ड. 18. द्वन्द्वाच्चुदषहान्तात् समाहारे इति टच् इत्यधिकम् फ. 19. इत्यनुवर्तते ड.